# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – १** | **प्रश्नपत्रम् – ४** | **गुणाः – ५०** |
| **विषयः – वेदः** | **सत्रम् – २** | **समयः – २ तः ४** |
| **दिनाङ्कः – १६/०७/२०२१** | **सन्दर्भग्रन्थः – कात्यायनश्रौतसूत्रम् एवं वैदिकी प्रक्रिया** | |

सूचना - **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः सूत्रयोः व्याख्या कार्या।**

१ पूर्वां पौर्णमासीमुत्तरां वोपवसेत्।

२ सत्यवाद्यतः।

३ वाचस्पते यज्ञं गोपायेत्याह।

४ प्रतिष्ठेति ब्रूयाद्वा।

**प्रश्नः २** कात्यायनश्रौतसूत्रस्य सामान्यपरिचयः प्रस्तूयताम्।

**प्रश्नः ३** दर्शपूर्णमासयागस्य प्रतिपाद्यविषयान् सङ्क्षेपेण वर्णयत।

**प्रश्नः ४** अग्न्यन्वाधानविधिं यथाशास्त्रं विवेचयत।

**प्रश्नः ५** ब्रह्मवरणं एवञ्च तस्य कार्यसम्बन्धे एकं निबन्धं लिखत।

**प्रश्नः ६ अधोलिखितेषु द्वयोः टिप्पणी लिखत।**

१ अपां प्रणयनम्।

२ पात्रासादनम्।

३ हविष्करणम्।

४ वितुषीकरणम्।

**प्रश्नः ७** यथाशास्त्रं हविसंस्कारविधिं वर्णयत।

**प्रश्नः ८** वैदिक-लौकिकसंस्कृतभाषाभेदं सोदाहरणमुपस्थापयत।

**प्रश्नः ९** वैदिकप्रक्रियायाः प्रथमाध्यायस्य विषयवस्तु प्रस्तूयताम् ।

**प्रश्नः १०** वेदार्थज्ञानाय वैदिकप्रक्रियायाः योगदानं निरूपयत ।

**प्रश्नः ११ दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ लोके ‘पुनर्वसु’ इति पदस्य प्रयोगं कथं भवति ?

२ ‘क्षेत्रस्य पतिना वयम्’ इत्यत्र केन सूत्रेण घिसंज्ञा भवति ?

३ ‘वृषण्वसु’ इति पदे का संज्ञा भवति ?

४ सिद्धान्तकौमुद्याः वैदिकप्रक्रियायां कति अध्यायाः सन्ति ?

५ ‘छन्दसि’ इति पदस्य कोऽर्थः ?

६ कति प्रयाजाः ?

७ फलीकरणं कतिवारं करोति ?

८ अप उपस्पृशनं कदा करोति ?

९ अपां प्रणयनं कस्यां दिशि करोति ?

१० दर्शपूर्णमासयागे के सन्ति ऋत्विजः ?

११ ‘दर्श’ इति शब्दस्य कोऽर्थः ?

१२ हविः कुट्टनं कः करोति ?

१३ अग्नीषोमीयस्य कपालसङ्ख्या का ?

१४ आज्याधिश्रयणे कः मन्त्रः ?

१५ आज्यावेक्षणं कः करोति ?

****